# Vaishakhamase Narasimhajayantivratam

# વૈશાખમાસે નરસિંહજયન્તીવ્રતમ્

## Document Information

```
Text title : Vaishakhamase Narasimhajayantivratam
File name : vaishAkhamAsenarasiMhajayantIvratam.itx
Category : vishhnu, dashAvatAra, viShNu
Location : doc_vishhnu
Proofread by : M K Barman
Description/comments : nRRisiMhakosha 2 upAsanA khaNDa
Latest update : August 4, 2025
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# વૈશાખમાસે નરસિંહજયન્તીવ્રતમ્

અથ વૈશાખે નૃસિંહજયન્તીવ્રતમ્ । તદ્યથા ।
સનત્કુમાર ઉવાચ-
અગસ્ત્યાશ્રમં પદં પુણ્યં હેમાઙ્ગે પાર્શ્વ ઉત્તરે ।
પુણ્યદ્રુમલતાકીર્ણં પુણ્યદ્રુમસમાકુલમ્ ॥ ૧॥

પુણ્યભદ્રા નદી યત્ર ચિત્રાખ્યા ચ મહાશિલા ।
રાજન્તે સતતં નાનાદ્રુમાઃ પુણ્યફલાન્વિતાઃ ॥ ૨॥

મૃગાશ્ચ સહજં વૈરમુત્સૃજ્ય સુખમાસતે ।
તસ્મિન્વટતરોર્મૂલે ચરન્તં દુશ્ચરસ્તપઃ ॥ ૩॥

નિગૃહીતેન્દ્રિયગ્રામં બ્રહ્મભૂતમકલ્મષમ્ ।
સનત્કુમારો દદૃશે માર્કણ્ડેયં મહામુનિમ્ ॥ ૪॥

અથ તદ્ હૃદયં યોગી મૃત્યુરૂપં સમાવિશત્ ।
વસાનં વલ્કલં રમ્યં બિભ્રાણં પિઙ્ગલાં જટાન્ ॥ ૫॥

દૈદીપ્યમાનં તપસા જ્વલન્તમિવ પાવકમ્ ।
દૃષ્ટ્વા તદ્ હૃદયામ્ભોજે વિસ્મિતોભ્યુત્થિતસ્તદા ॥ ૬॥

પુરતઃ તં મુનિં પશ્યન્ પ્રણતઃ પર્યપૂજયેત્ ।
માર્કણ્ડેય ઉવાચ-
ધન્યોહ્યનુગૃહીતોઽસ્મિ મુનીન્દ્ર તવ દર્શનાત્ ॥ ૭॥

કિં દેવૈઃ કિઞ્ચિતૈસ્તીર્થૈઃ ચિરસેવાફલપ્રદે ।
દર્શને ભવતાં પુંસાં મૂર્ત્તાનાં શ્રેયસામિવ ॥ ૮॥

ન ભવદ્દર્શનાદન્યશ્રેયસઃ પરમુત્તમમ્ ।
તથાપિ કિઞ્ચિત્પૃચ્છામિ તત્વતો વક્તુમર્હસિ ॥ ૯॥

સર્વેષામપિ લોકાનાં લોક વૈ પરમેષ્ટિનઃ ।

યમામનન્તિ તપસાં ફલમિજ્યામનુત્તમમ્ ॥ ૧૦॥

યં પ્રાપ્ય ન નિવર્તત યોગિનો નિર્મલાશયા ।
મૂર્તિમન્તો યત્ર વેદા પુરાણાનિ ચ કૃત્સ્નશઃ ॥ ૧૧॥

યત્ર ગત્વા ન શોચન્તિ યત્રકામાદયો ન વા ।
તત્સ્થાનં પરમં શ્રેષ્ઠં યદ્યસ્તિ વદ મે પ્રભો ॥ ૧૨॥

સનત્કુમાર ઉવાચ-
શ્રૃણુષ્વ વક્ષ્યે પરમં શ્લાઘ્યં તત્પરમેષ્ઠિનઃ ।
સકાશાદ્ બ્રહ્મણો યદ્વૈ સાક્ષાત્ પૂર્વમયા શ્રુતમ્ ॥ ૧૩॥

સઙ્કર્ષણે પ્રાગ્નિકે ચ નાનાખ્યાનોપવર્ણકે ।
બ્રહ્મોવાચ-
અનન્ત શ્રુણુ વક્ષ્યામિ કથામન્યાં મહદ્ભુતામ્ ॥ ૧૪॥

તરન્તિ હિ ભવામ્બોધિ યસ્યાઃ શ્રવણમાત્રતઃ ।
મદીયા માનસાઃ પુત્રાઃ શ્રીવૈકુણ્ઠદિદૃક્ષવઃ ॥ ૧૫॥

ગતા નિવારિતાસ્તસ્થુઃ શપ્તવન્તો નિરોધિતાઃ ।
તતો જયશ્ચ વિજયઃ પ્રાપ્તા વસુરસમ્ભવઃ ॥ ૧૬॥

હિરણ્યકશિપુર્નામ હિરણ્યાક્ષ ઇતિ શ્રુતૌ ।
તતો હિરણ્યકશિપુસ્તપસ્તપ્ત્વા સુદુષ્કરમ્ ॥ ૧૭॥

અમૃત્યું મામકાત્સર્ગાલ્લબ્ધં જગદપીડયત્ ।
તસ્માત્ક્રૂરતમાજ્જાતઃ પ્રહ્લાદો વૈષ્ણવોત્તમઃ ॥ ૧૮॥

લોકાનામુપકારાય સાગરાદમૃતં યથા ।
હરેલાલાપરે તસ્મિન્ બાલક્રીડાસુ સર્વશઃ ॥ ૧૯॥

ભક્તિં ચકાર વિશ્વેશ વિશ્વેશાનુગ્રહેરિતઃ ।
નામૃષ્યત્સ હરિદ્વેષી પ્રહ્લાદં ભગવત્પ્રિયમ્ ॥ ૨૦॥

યાતનાભિશ્ચ ઘોરાભિઃ પીડયામાસ તં સદા ।
શસ્ત્રાણ્યુત્પલસારાણિ વહ્નયશ્ચન્દ્રશીતલાઃ ॥ ૨૧॥

નારાયણે હૃદિસ્થે ચ વિષાણ્યમૃતતાં યયુઃ ।
નૈનં વ્યથયિતું શેકુઃ શમ્બરા દિગ્ગજાદયઃ ॥ ૨૨॥

યદ્યદ્બાલવધાર્થં સ કુરુતે ક્રૂરચેષ્ટિતમ્ ।

તત્તત્સુખાય તસ્યાસીત્ હૃદયસ્થે જનાર્દને ॥ ૨૩॥

એવભિરર્થયતનોહરિચિન્તનેન
સ્તુત્યોપદેશભુવનૈશ્ચ કુમારસ્ય ।
આદાય ખડ્ગમતિરોષકષાયિતાઃ
પ્રોવાચ બાલક તતસ્તવરક્ષકઃ ॥ ૨૪॥

રક્ષેન્માં હરિરેવદુષ્ટશમનઃ ક્વાસૌ હરિર્દુર્મતે ।
સ સ્તમ્ભે પરિદૃશ્યતામિતિ વચઃ શ્રુત્વેતિ પુત્રોદિતમ્ ॥ ૨૫॥

ક્રુદ્ધસ્તમ્ભમતાડ્યદૃઢમહિં સુપ્તં યથા બોધયન્ ।
તસ્માદદ્ભુત ભીષણોધ્વનિરભૂદ્રક્ષઃ સભાં ભીષયન્ ॥ ૨૬॥

રક્ષોવધાર્થં વૈ મેનિરે તે સભાસદાઃ ।
દૈત્યો પૂર્વાદ્ભુતાત્યુગ્રાધ્વનિમાકર્ણ્ય વિહ્વલાઃ ॥ ૨૭॥

વ્યાધુન્વન્ સહકેસરૈર્ગ્રહગણાન્ શ્વાસૈર્ગિરીશ્ચાલયન્ ।
ધાત્રી સન્નમયન્મદૈર્દશદિશો દેદીપયન્ દૃષ્ટિભિઃ ॥ ૨૮॥

જ્વાલામુદ્વમયન્ કઠોરદશનૈર્હસ્તૈર્નભઃ પૂરયન્ ।
દાદદ્ભુતવિગ્રહો નરહરિઃ પ્રાદુર્ભવન્નૈ ક્ષણત્ ॥ ૨૯॥

યોઽદ્ભુતમુદ્ભૂતં વીક્ષ્ય દૈત્યેન્દ્રં સ નૃકેસરી ।
ઉરૌ નિપાત્ય તદ્રક્ષો દદાર નખરૈઃ કરૈઃ ॥ ૩૦॥

તદા નૃસિંહહુઙ્કારૈરન્યૈર્દૈત્યાઃ ક્ષયં ગતાઃ ।
મહાન્ધતમસવ્રાતા માર્તણ્ડસ્યોદયો દિવા ॥ ૩૧॥

દેવદુન્દુભયોર્નેદુર્વવર્ષઃ પુષ્પવૃષ્ટયઃ ।
જજ્વલુશ્ચાગ્નયઃ શાન્તાઃ સુપ્રભોભૂદ્દિવાકરઃ ॥ ૩૨॥

દિશસ્તુ નિર્મલા જાતા વાયવઃ સુખશીતલામ્ ।
સકાલઃ સર્વજગતાં સુખાય સમજાયત ॥ ૩૩॥

બ્રહ્માદયસ્તદાગત્ય નન્દતોભિભયાન્વિતાઃ ।
અદૃષ્ટપૂર્વં પશ્યન્તો દૂરઃ સ્થિત્વા નમસ્તુવન્ ॥ ૩૪॥

જય શ્રીનરસિંહેશ મહાભયનિવારણ ।
પ્રસીદ કરુણામ્ભોધે ભગવન્ ભક્તવત્સલ ॥ ૩૫॥

પાપેનાન્તરિતા સેવા યેન જન્મત્રયાવધિ ।

અહોત્યન્તસ્ય ભગવન્ નિગ્રહોઽયમનુગ્રહઃ ॥ ૩૬॥

ઇતિ વૈશાખમાસે નરસિંહજયન્તીવ્રતવર્ણનં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Vaishakhamase Narasimhajayantivratam*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*